# Shri Siddhalinga Ashtakam

# श्री सिद्धलिङ्गाष्टकम्

## Document Information

Text title : Shri Siddalinga Ashtakam

File name : siddhalingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : M. G. Nanjundaradhya

Proofread by : Vani V.

Latest update : October 31, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2022

*sanskritdocuments.org*

# श्री सिद्धलिङ्गाष्टकम्

-श्री एम. जि. नञ्जुण्डाराध्यविरचितं

आत्मानात्मविवेकपूर्णकुशलं विद्यावधूवल्लभं
पञ्चाचारविचार षड्स्थलसुधास्वादैकवेद्यं विभुम् ।
व्योमातीत सुकीर्तियुक्तममलं भक्तेष्टसिद्धि प्रदं
वन्दे तोण्टद सिद्धलिङ्गयतिनं श्रीशैवरत्नाकरम् ॥ १॥

यं ब्रह्मेन्द्रमरुद्गणाः प्रतिदिनं ध्यायन्ति भक्त्या मुदा
वेदाद्यैःप्रतिपाद्यमानविभवं तं देवदेवं शिवम् ।
योगाभ्यासबलान्नियम्य हृदये यो लोकवन्द्यो बभौ
वन्दे तोण्टद सिद्धलिङ्गयतिनं श्री शैवरत्नाकरम् ॥ २॥

सत्पत्नीतनुजाप्तमित्र विभवा नित्याः किलेति प्रभो !
भ्रान्तोऽहं निजतत्वमार्गविमुखो घूर्णामि भूमौ सदा ।
आशापाशविमोचनैकचतुरं त्वां सर्वसंरक्षकं
वन्दे तोण्टद सिद्धलिङ्गयतिनं श्रीशैवरत्नाकम् ॥ ३॥

निर्लिप्तं करुणाकरं सुखमयं शान्तं महोत्साहिनं
भक्ताधीनसुमङ्गलाङ्गविभवं चिल्लिङ्गलोलं गुरुम् ।
वेदान्तागमशास्त्रविदमणिं सत्यव्रतं स्वामिनं
वन्दे तोण्टद सिद्धलिङ्गयतिनं श्रीशैवरत्नाकरम् ॥ ४॥

लब्ध्वापुण्यलवं शिवस्य कृपया प्राप्य स्वरूपश्रियं
मूकान्धादिविकारजालसरणिं यावत्तु न प्राप्नुयाम् ।
तावत्वां सुरसेवितं सुखकरं संसारशैलाशनिं
वन्दे तोण्टद सिद्धलिङ्गयतिनं श्रीशैवरत्नाकरम् ॥ ५॥

विद्युल्लोलविलोभकारिविषयव्यासक्त चित्तस्सदा
कामक्रोधनिबद्धमूर्तिरनिशं ताम्यामि भूमौ विभो ! ।
मोहाम्भोनिधितारकं यतिनुतं सुज्ञानदानाग्रणीं

वन्दे श्रीगुरु सिद्धलिङ्गयतिनं श्रीशैवरत्नाकरम् ॥ ६॥

मोहध्वान्तविभेदकं शिवरतिज्योत्सनासुधासेचकं
पुण्यारण्यचरैक दिव्यशिखिनं कैवल्यकल्पद्रुमम् ।
संसारार्णवमग्नलोकतरणिं भव्यात्मसंशोभितं
वन्दे तोण्टद सिद्धलिङ्गयतिनं श्रीशैवरत्नाकरम् ॥ ७॥

आनन्दाम्बुधिचन्द्र बन्धुर कृपामन्दार सत्याश्रय
नानायोगिवरेण्यवन्दित लसत्पादाब्ज विद्योतित ।
भानुज्योतिरतीतकान्तिमहिमः श्रीसिद्धलिङ्गप्रभो !
त्वां वन्दे भवमोचनायसुगुरो ! मां रक्ष रक्षाधुना ॥ ८॥

सिद्धलिङ्गाष्टकं लोके यः पठेच्छृणुयादपि
विमुच्यकिल्बिषैस्सर्वैशिवप्रीतिमवाप्नुयात् ।
अमरोक्ताष्टकं चेदं जीयादाचन्द्रतारकम्
भक्तेष्टार्थप्रदो देवो सिद्धलिङ्गो विराजतम् ॥

इति अमरवाण्यभिध नञ्जुण्डाराध्यविरचितं सिद्धलिङ्गाष्टकं सम्पूर्णम् ।

Proofread by Vani V.

*Shri Siddhalinga Ashtakam*

pdf was typeset on October 31, 2022

Please send corrections to *sanskrit@cheerful.com*